१०

धातुस्वरः प्रातिपदिकस्वरः च

प्रस्तावना

वैदिकवाङ्मये स्वरप्रकरणम् अतीव माहात्म्यम् आवहति। भगवता पाणिनिना विरचिता या अष्टाध्यायी तत्र वैदिकस्वरविषयकानि सूत्राणि प्राधान्येन षष्ठाध्यायाद् आरभ्य ग्रन्थस्य आसमाप्तिं यावद् उपन्यस्तानि। अस्मिन् पाठे तु धातोः विहितानां स्वराणां प्रतिपदिकाच्च विहितानां स्वराणां विषये आलोचना विद्यते। तत्रापि च उदात्तस्वरविषये एव प्राधान्येन आलोचना विहिता। उदाहरणेषु कुत्र उदात्तस्वरः भवति इति प्रक्रियापुरःसरं प्रदर्शितम्।

उद्देश्यानि

अमुं पाठं पठित्वा भवान् -

- धातोः विहितानां स्वराणां विषये ज्ञास्यति।
- प्रतिपदिकाद्विहितानां स्वराणां विषये ज्ञास्यति।
- उदात्तस्वरविषये ज्ञास्यति।
- स्वरप्रक्रियां ज्ञास्यति।
- स्वरविषये पटुः भवितुं शक्नुयात्।
- सूत्राणां अर्थनिर्णयं कर्तुं समर्थो भवेत्।
- सूत्राणां व्याख्यानं कर्तुं समर्थो भवेत्।
- अनुवृत्त्यादिना सूत्रार्थनिर्णयमपि कर्तुं शक्नुयात्।

अथ धातुस्वराः

१०.१) धातोः॥ (६.१.१६२)

सूत्रार्थः - अन्तः उदात्तः भवति।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण उदात्तस्वरः विधीयते। अस्मिन् सूत्रे षष्ठ्यन्तम् एकमेव पदम् अस्ति धातोः इति। अस्मिन् सूत्रे कर्षात्वतो घञोऽन्त उदात्तः इत्यस्मात् सूत्राद् अन्तः उदात्तः इति पदद्वयम् अनुवर्तते। उदात्तानुदात्तादिकम् अचः एव सम्भवन्ति अतः अन्तः अच् इति लभ्यते। तेन सूत्रार्थः भवति धातोः अन्तः अच् उदात्तः भवति इति।

उदाहरणम्- अस्य उदाहरणं भवति गोपायतं नः इति, असि सत्यः इति च।

सूत्रार्थसमन्वयः- गुपूधातोः पकारोत्तरस्य ऊकारस्य इत्संज्ञायां तस्य लोपः इत्यनेन लोपे च गुप् इति स्थिते अस्य धातोः एकः एव अच् विद्यते तेन यथा कस्यापि यदि एकः एव पुत्रः स्यात् तर्हि स एव आदिः स एव अन्तः तद्वद् अत्रापि गुप्धातोः गकारोत्तरः उकारः एव आदिः अकारः एव अन्तः, अतः अस्य अकारस्य प्रकृतसूत्रेण उदात्तस्वरः। ततः गुप्-इति धातोः आयप्रत्ययः विहितः तेन निष्पन्नस्य गोपाय इत्यस्य पकारोत्तस्य आकारस्य आद्युदात्तश्च इत्यनेन आद्युदात्तस्वरः। सनाद्यन्ता धातवः इत्यनेन गोपाय- इति धातुसंज्ञकः, अतः तस्य अन्तस्य अकारस्यापि प्रकृतसूत्रेण उदात्तस्वरः। ततः गोपायधातोः लोटि मध्यमपुरुषैकवचने थस्प्रत्यये गोपाय थस् इति स्थिते गोपाय-धातोः शबादेशेऽनुबन्धलोपे गोपाय अ थस् इति स्थिते शपः अकारस्य अनुदात्तौ सुप्पितौ इत्यनेन अनुदात्तस्वरः। यकारोत्तरस्य अकारस्य शपः अकारस्य च अतो गुणे इत्यनेन पररूपैकादेशः,तस्य च एकादेश उदात्तेनोदात्तः इत्यनेन उदात्तस्वरः। ततः थसः तम् इत्यादेशः, तस्य अदुदेशपरत्वात् तास्यानुदात्तेन्ङिदुपदेशात् इत्यनेन अनुदात्तस्वरः, ततः उदात्तानुदात्तस्य स्वरितः इत्यनेन तकारोत्तरवर्तिनः अकारस्य स्वरितस्वरः- एवं गोपायतम् इति सिध्यति। असि सत्यः इत्यत्र अस्-धातोः मध्यमपुरुषैकवचने सिप्प्रत्ययेऽनुबन्धलोपे अस् सि इति स्थिते तासस्त्योर्लोपः इत्यनेन सकारलोपे अकारस्य उदात्तस्वरः, ततः परस्य च स्वरितस्वरः। सत्यशब्दे सकारस्य उदात्तस्वरितपरस्य इत्यनेन इत्यनुदात्तस्वरः।

१०.२) स्वपादिर्हिंसामच्यनिटि॥ (६.१.१८८)

सूत्रार्थः - स्वपादीनां हिंसेश्चानिट्यजादौ लसार्वधातुके परे आदिरुदात्तो वा स्यात्।

सूत्रव्याख्या- विधिसूत्रम्। अनेन सूत्रेण उदात्तस्वरः विधीयते। अस्मिन् सूत्रे त्रीणि पदानि सन्ति, स्वपादिर्हिंसाम् अचि अनिटि इति सूत्रगतपदच्छेदः। स्वपादिसहिंसाम् इति षष्ठीबहुवचनान्तम्, अचि इति सप्तम्यन्तम्, अनिटि इति सप्तम्यन्तं पदम्। न इट् अनिट् तस्मिन् अनिटि इड्भिन्ने इत्यर्थः। स्वप्-धातुः आदिः यस्य सः स्वपादिः,स्वपादिश्च हिंस् च स्वपादिर्हिंसः छन्दसि बहुवचनम्, तेषां स्वपादिर्हिंसाम् इति। स्वपादिगणः अदादिगणान्तर्गतः एकः गणः, तत्र पठितानां धातूनां हिंस्-धातोश्च इत्यर्थः। अस्मिन् सूत्रे कर्षात्वतो घञोऽन्त उदात्तः इत्यस्मात् सूत्रात् उदात्तः इति प्रथमान्तं पदम् अनुवर्तते। तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमन्ह्विङोः इत्यस्मात् सूत्रात् लसार्वधातुकम् इति पदम् अनुवर्तते। तच्चात्र सप्तम्यन्ततया विपरिणम्यते। लसार्वधातुकम् इत्यस्य लकारस्य स्थाने जातमित्यर्थः। तेन तिङ्, शतृ-शानच्-इत्येते गृह्यन्ते। आदिः सिचोऽन्यतरस्याम् इत्यस्माद् आदिः इति पदम् अन्यतरस्याम् इति अव्ययपदं चानुवर्तते। अचि इति लसार्वधातुके इत्यस्य विशेषणं तेन यस्मिन्

विधिस्तदादावल्ग्रहणे इत्यनया परिभाषया तदादिविधिः भवति, तेन अजादौ लसार्वधातुके इति प्राप्यते। तेन अस्य सूत्रस्य अर्थो भवति स्वपादीनां धातूनां हिंस्-धातोश्च इड्भिन्ने अजादौ लसार्वधातुके परे आदिः उदात्तः वा भवति इति।

उदाहरणम्- अस्य उदाहरणानि- स्वपन्ति, श्वसन्ति, हिंसन्ति इत्यादीनि।

सूत्रार्थसमन्वयः- स्वप्-धातुः श्वस्-धातुश्च स्वपादिगणे पठितः। रुधादिगणीयः हिंस्-धातुरपि प्रकृतसूत्रे गृहीतः। तेन एतेषां धातूनां प्रथमपुरुषबहुवचनविवक्षायां झिप्रत्यये झेरन्तादेशे प्रक्रियाकार्ये स्वप् अन्ति, श्वस् अन्ति, हिंस् अन्ति इति जाते इड्भिन्नस्य अजादिलसार्वधातुकस्य परत्वात् प्रकृतसूत्रेण धातूनाम् आदिः अच् विकल्पेन उदात्तः भवति। अत्र उदात्तस्वरस्य वैकल्पिकत्वात् तदभावपक्षे प्रत्ययस्वरं निमित्तीकृत्य मध्ये उदात्तस्वरः भवति।

विशेषः- वृत्तिकारानुरोधेन किति ङिति च परे एव अयम् आद्युदात्तस्वरः भवति। सूत्रे अचि इति पदग्रहणात् स्वप्यात्, हिंस्याद् इत्यादिषु न आद्युदात्तस्वरः अजादिलसार्वधातुकस्य अभावाद् इति। सूत्रे अनिट्-इत्यस्य ग्रहणात् इट्सहितलसार्वधातुके परे इदं सूत्रं न प्रवर्तते। यथा स्वपितः, श्वसितः इत्यादौ इडागमस्य विद्यमानत्वात् न आद्युदात्तस्वरः।

१०.३) अभ्यस्तानामादिः॥ (६.१.१८९)

सूत्रार्थः- अनिट्यजादौ लसार्वधातुके परे अभ्यस्तानामादिरुदात्तः।

सूत्रव्याख्या- विधिसूत्रम्। अनेन सूत्रेण अभ्यस्तानाम् आदेः उदात्तस्वरः विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः, अभ्यस्तानाम् आदिः इति सूत्रगतपदच्छेदः। अभ्यस्तानाम् इति षष्ठीबहुवचनान्तम, आदिः इति प्रथमैकवचनान्तं पदम्। धातोः यदा द्वित्वं भवति तदा समुदायः अभ्यस्तसंज्ञकः भवति। अस्मिन् सूत्रे कर्षात्वतो घञोऽन्त उदात्तः इत्यस्मात् सूत्रात् उदात्तः इति प्रथमान्तं पदम् अनुवर्तते। उदात्तानुदात्तादिकम् अचः एव सम्भवन्ति अतः अच् इति लभ्यते। स्वपादिहिंसामच्यनिटि इत्यस्माद् अचि अनिटि इति सप्तम्यन्तं पदद्वयम् अनुवर्तते। न इट् अनिट् तस्मिन् अनिटि इड्भिन्ने इत्यर्थः। तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमन्ह्विङोः इत्यस्मात् सूत्रात् लसार्वधातुकम् इति पदम् अनुवर्तते तच्चात्र सप्तम्यन्ततया विपरिणम्यते। लसार्वधातुकम् इत्यस्य लकारस्य स्थाने जातमित्यर्थः। तेन तिङ्- शतृ-शानच्-इत्येते गृह्यन्ते। अचि इति लसार्वधातुके इत्यस्य विशेषणं तेन यस्मिन् विधिस्तदादावल्ग्रहणे इत्यनया परिभाषया तदादिविधिः भवति, तेन अजादौ लसार्वधातुके इति प्राप्यते। तेन सूत्रार्थो भवति इड्भिन्ने अजादिलसार्वधातुके परे अभ्यस्तसंज्ञकानाम् आदिः अच् उदात्तः भवति।

उदाहरणम्- अस्य उदाहरणं भवति - बिभ्र॑ती ज॒राम्।(तै.सं-४-३-११-५)। यदा॑ह॒वनी॒ये जु॒ह्व॑ति। (तै.ब्रा.१-१-१०-५)।

सूत्रार्थसमन्वयः- बिभ्र॑ती इत्यत्र डुभृञ् धारणपोषणयोः इति धातोः शतृप्रत्ययेऽनुबन्धलोपे कर्तरि शप् इत्यनेन शप्प्रत्यये जुहोत्यादिभ्यः श्लुः इत्यनेन शपः लोपे श्लौ इत्यनेन सूत्रेण धातोः द्वित्वं भवति। तेन समुदायस्य अभ्यस्तसंज्ञा भवति। ततः पूर्वोऽभ्यासः इत्यनेन पूर्वस्य अभ्याससंज्ञायां भृञामित् इत्यनेन अभ्यस्तस्य अचः ऋकारस्य इकारे अभ्यासे चर्च इत्यनेन भकारस्य जश्त्वे वकारे बिभृ

अत् इति स्थिते इको यणचि इत्यनेन ऋकारस्य रकारे निष्पन्नस्य बिभ्रत् इत्यस्य शत्रन्तत्वात् स्त्रियाम् उगितश्च इत्यनेन ङीपि अनुबन्धलोपे ईकारे बिभ्रती इति रूपम्। अत्र अस्य धातोः अभ्यस्तत्वात् प्रकृतसूत्रेण आदिस्वरः उदात्तः भवति।

जुह्वति इत्यत्र हु दानादनयोः इति धातोः लट्-लकारे प्रथमपुरुषस्य बहुवचने झिप्रत्यये पूर्ववत् श्लुप्रत्यये पूर्ववद् द्वित्वं भवति। तेन अयं धातुः अभ्यस्तसंज्ञकः। ततः अभ्याससंज्ञायां च हु हु झि इति स्थिते कुहोश्चुः इत्यनेन हकारस्य झकारे अभ्यासे चर्च इत्यनेन झकारस्य जकारे जु हु झि इति स्थिते अदभ्यास्तात् इत्यनेन झकारस्य अदादेशे जुहु अति इति स्थिते हुश्नुवोः सार्वधातुके इत्यनेन हु-इत्यस्य उकारस्य स्थाने वकारे जुह्वति इति सिध्यति। अत्र प्रकृतसूत्रेण अस्य धातोः आदिः अच् उदात्तः भवति।

ये ददति प्रिया वसु इति दधाना इन्द्रं इत्यादीन्यपि अस्य उदाहरणानि। अत्र दधाना इत्यत्र चितः इत्यनेन अन्तोदात्तस्वरः विहितः। परन्तु अष्टाध्याय्यां चितः इति सूत्रापेक्षया अस्य सूत्रस्य परत्वात् अन्तोदात्तस्वरं बाधित्वा अनेन सूत्रेण आद्युदात्तस्वरः।

विशेषः- आदिः सिचोऽन्यतरस्याम् इत्यस्मात् सूत्रात् अस्मिन् सूत्रे आदिः इति पदम् अनुवर्तते तथापि अत्र आदि इति पदग्रहणम् आद्युदात्तस्वरस्य नित्यविधानार्थम्, अन्यथा आदिग्रहणाभावे तस्मादेव सूत्राद्(आदिः सिचोऽन्यतरस्याम्) अन्यतरस्याम् इति आगमिष्यति, तेन अनेन सूत्रेण आद्युदात्तस्वरः विकल्पेन भविष्यति, तद्यथा न स्यात् तदर्थम् आदिग्रहणमिति बोध्यम्।

१०.४) अनुदात्ते च॥ (६.१.१९०)

सूत्रार्थः- अविद्यमानोदात्ते लसार्वधातुके परेऽभ्यस्तानामादिरुदात्तः।

सूत्रव्याख्या- विधिसूत्रमिदम्। अनेन सूत्रेण उदात्तस्वरो विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। अनुदात्ते इति सप्तम्यन्तं पदम्। च इति अव्ययपदम्। न उदात्तः अनुदात्तः तस्मिन् अनुदात्ते इति अविद्यमानोदात्ते इत्यर्थः। अभ्यस्तानामादिः इत्यस्मात् सूत्रात् अभ्यस्तानाम् इति षष्ठीबहुवचनान्तम्, आदिः इति च प्रथमान्तं पदमत्र अनुवर्तते। धातोः यदा द्वित्वं भवति तदा समुदायः अभ्यस्तसंज्ञकः। अस्मिन् सूत्रे कर्षात्वतो घञोऽन्त उदात्तः इत्यस्मात् सूत्रात् उदात्तः इति प्रथमान्तं पदम् अनुवर्तते। उदात्तानुदात्तादिकम् अचः एव सम्भवति अतः अच् इति लभ्यते। तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमन्ह्विङोः इत्यस्मात् सूत्रात् लसार्वधातुकम् इति पदम् अनुवर्तते तच्चात्र सप्तम्यन्ततया विपरिणम्यते। लसार्वधातुकम् इत्यस्य लकारस्य स्थाने जातमित्यर्थः। तेन तिङ्- शतृ-शानच्-इत्येते गृह्यन्ते। लसार्वधातुकम् इत्यत्र सप्तमीनिर्देशात् तस्मिन्निति निर्दिष्टे पूर्वस्य इत्यनेन तस्मिन् परे सति पूर्वस्य कार्यम् इति ज्ञायते। एवम् अस्य सूत्रस्य अर्थः भवति यत्र उदात्तस्वरः नास्ति तादृशे लसार्वधातुके परे अभ्यस्तसंज्ञकानां धातूनाम् आदिः अच् उदात्तः भवति।

उदाहरणम्- अस्य उदहरणं भवति दधासि रत्नं द्रविणं च दाशुषे इति।

सूत्रार्थसमन्वयः- अत्र दधासि इत्यत्र धाधातोः मध्यमपुरुषैकवचने सिप्प्रत्यये धा सिप् इति स्थिते शपि तस्य च जुहोत्यादिभ्यः श्लुः इत्यनेन लोपे श्लौ इत्यनेन धाधातोः द्वित्वं सम्भवति तेन अस्य

धातोः द्वित्वत्वाद् अयं धातुः अभ्यस्तसंज्ञकः। ततः पूर्ववत् अस्य अभ्याससंज्ञायां ह्रस्वः इत्यनेन अभ्यासस्य अचः ह्रस्वे ततः जश्त्वे च दधा सिप् इति स्थिते सिपः पित्त्वात् अनुदात्तौ सुप्पितौ इत्यनेन सकारोत्तरः इकारः अनुदात्तसंज्ञकः। तेन ति-इति उदात्तभिन्नस्य लसार्वधातुकस्य परत्वात् पूर्वस्य अभ्यस्तसंज्ञकस्य धाधातोः आदेः अचः दकारोत्तरस्य अकारस्य प्रकृतसूत्रेण उदात्तस्वरः सिध्यति।

१०.५) भीह्रीभृहुमदजनधनदरिद्राजागरां प्रत्ययात्पूर्वं पिति॥ (६.१.१९२)

सूत्रार्थः- भीप्रभृतीनामभ्यस्तानां पिति लसार्वधातुके परे प्रत्ययात्पूर्वम् उदात्तं भवति।

सूत्रव्याख्या- विधिसूत्रमेतत्। अनेन सूत्रेण उदात्तस्वरो भवति। अस्मिन् सूत्रे चत्वारि पदानि सन्ति। भीह्रीभृहुमदजनधनदरिद्राजागराम् इति षष्ठीबहुवचनान्तं, प्रत्ययात् इति पञ्चम्येकवचनान्तं, पूर्वमिति प्रथमैकवचनान्तं, पिति इति सप्तम्येकवचनान्तं पदम्। अस्मिन् सूत्रे कर्षात्वतो घञोऽन्त उदात्तः इत्यस्मात् सूत्रात् उदात्तः इति प्रथमान्तं पदम् अनुवर्तते। अभ्यस्तानामादिः इत्यस्मात् सूत्रात् अभ्यस्तानाम् इति षष्ठीबहुवचनान्तं पदमत्र अनुवर्तते। धातोः यदा द्वित्वं भवति तदा द्वित्वविशिष्टधातुः अभ्यस्तसंज्ञकः। तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमन्ह्विङोः इत्यस्मात् सूत्रात् लसार्वधातुकम् इति पदम् अनुवर्तते तच्चात्र सप्तम्यन्ततया विपरिणम्यते। लसार्वधातुकम् इत्यस्य लकारस्य स्थाने जातमित्यर्थः। तेन तिङ्- शतृ-शानच्-इत्येते गृह्यन्ते। लसार्वधातुके इत्यत्र पिति इत्यत्र च सप्तमीनिर्देशात् तस्मिन्निति निर्दिष्टे पूर्वस्य इत्यनेन तस्मिन् परे सति पूर्वस्य कार्यम् इति ज्ञायते। तेन अस्य सूत्रस्य अर्थो भवति भीह्रीभृहुमदजनधनदरिद्राजागराम् अभ्यस्तानां पिति लसार्वधातुके परे प्रत्ययात्पूर्वम् उदात्तं भवति।

उदाहरणम्- अस्य उदहरणं भवति यो॑ऽग्निहो॒त्रं जु॒होति॑।

सूत्रार्थसमन्वयः- हुधातोः लटि प्रथमपुरुषैकवचे तिप्प्रत्यये पकारस्य हलन्त्यम् इत्यनेन इत्संज्ञायां तस्य लोपः इत्यनेन लोपे द्वित्वादिकार्ये जुहो ति इति स्थिते तिपः तिङ्प्रत्ययेषु पाठात् तिङ्शित्सार्वधातुकम् इत्यनेन तिपः सार्वधातुकसंज्ञा सिध्यति। एवञ्च पिति सार्वधातुकसंज्ञके तिप्प्रत्यये परे सति पूर्वस्य हकारोत्तस्य ओकारस्य प्रकृतसूत्रेण उदात्तस्वरः सिध्यति।

१०.६) लिति॥ (६.१.१९३)

सूत्रार्थः- प्रत्ययात्पूर्वमुदात्तं भवति।

सूत्रव्याख्या- विधिसूत्रमेतत्। अनेन सूत्रेण उदात्तस्वरः भवति। अस्मिन् सूत्रे लिति इति सप्तम्यन्तम् एकमेव पदम् अस्ति। लकारः इत् यस्य सः लित् , तस्मिन् इत्यर्थः। लिति इत्यत्र सप्तमीनिर्देशात् तस्मिन्निति निर्दिष्टे पूर्वस्य इत्यनेन लिति परे पूर्वस्य कार्यमिति बोध्यम्। अस्मिन् सूत्रे कर्षात्वतो घञोऽन्त उदात्तः इत्यस्मात् सूत्रात् उदात्तः इति प्रथमान्तं पदम् अनुवर्तते। प्रथमान्तत्वाद् विधायकं पदमेतत्। भीह्रीभृहुमदजनधनदरिद्राजागरां प्रत्ययात् पूर्वं पिति इत्यस्मात् सूत्रात् प्रत्ययाद् इति

पञ्चम्यन्तं, पूर्वमिति प्रथमान्तं पदं च अनुवर्तते। तेन सूत्रार्थो भवति लिति परे प्रत्ययस्य पूर्वस्वरः उदात्तः भवति।

उदाहरणम्- अस्य उदाहरणं भवति चिकीर्षकः इति, यत्र॑ बा॒णाः(तै.सं.-४-६-४-५) इति च।

सूत्रार्थसमन्वयः- कृधातोः सनि द्वित्वादिकार्ये चिकीर्ष इति स्थिते ततः ण्वुल्प्रत्ययेऽनुबन्धलोपे चिकीर्ष वु इति स्थिते युवोरनाकौ इत्यनेन वोः अकादेशे षकारोत्तरस्य अकारस्य लोपे चिकीर्ष् अक इति स्थिते ण्वुल्प्रत्ययस्य लित्त्वात् तस्मिन् परे पूर्वस्य ककारोत्तरस्य ईकारस्य प्रकृतसूत्रेण उदात्तस्वरः विधीयते। ततः सर्वसंयोगे विभक्त्यादिकार्ये चिकीर्षक इति रूपं सिध्यति। यच्छब्दात् सप्तम्यास्त्रल् इत्यनेन त्रल्प्रत्यये त्रल्प्रत्ययस्य लित्त्वात् ततः पूर्वस्य यकारोत्तस्य अकारस्य प्रकृतसूत्रेण उदात्तस्वरः सिद्धति।

पाठगतप्रश्नाः-१

२९. धातोः अन्ते कः स्वरः भवति?.

३०. स्वपादिगणः कस्य गणस्य अन्तर्गतः गणः?

३१. अभ्यस्तानामादिः इति सूत्रस्य कोऽर्थः?

३२. अनुदात्ते च इत्यस्य कोऽर्थ?

३३. जुहोति इत्यत्र हकारोत्तरस्य ओकारस्य कः स्वरः?

३४. यत्र इत्यत्र यकरोत्तरस्य अकारस्य उदात्तस्वरः केन सूत्रेण भवति?

अथ प्रातिपदिकस्वराः

१०.७) कर्षात्वतो घञोऽन्त उदात्तः॥ (६.१.१५९)

सूत्रार्थः- कर्षतेर्धातोराकारवतश्च घञन्तस्यान्त उदात्तः स्यात्।

सूत्रव्याख्या- विधिसूत्रमेतत्। अनेन सूत्रेण उदात्तस्वरः विधीयते। अस्मिन् सूत्रे चत्वारि पदानि विद्यन्ते। कर्षात्त्वतः इति षष्ठ्येकवचनान्तं, घञः इत्यपि षष्ठ्येकवचनान्तम्, अन्तः इति प्रथैकवचनान्तम्, उदात्तः इत्यपि प्रथमैकवचनान्तं पदम्। कर्षात्वतः इत्यत्र कर्षश्च आत्वतश्च इति विग्रहः। कर्षधातोः आकारयुक्तस्य धातोः च इत्यर्थः। घञः इति कर्षात्वतः इत्यस्य विशेषणम्, तेन तदन्तविधिना घञन्तस्य कर्षात्वतः इति लभ्यते। उदात्तानुदात्तादिकं च अचः एव सम्भवति अतः अच् इत्यपि संयुज्यते। तेन अस्य सूत्रस्य अर्थो भवति घञन्तकर्षधातोः घञन्ताकारयुक्तधातोश्च अन्तः अच् उदात्तः भवति इति।

उदाहरणम्- अस्य उदाहरणं भवति कर्षः इति, दायः इति च।

सूत्रार्थसमन्वयः- कृष विलेखने इति धातोः घञ्प्रत्यये कर्षः इति रूपम्। अत्र घञन्तस्य कर्ष-इत्यस्य अन्तस्य षकारोत्तस्य अकारस्य प्रकृतसूत्रेण उदात्तस्वरः।

दा दाने इति आकारयुक्तधातोः आतो युक्चिण्कृतोः इत्यनेन घञ्प्रत्यये दायः इति रूपम्। अत्र आत्वतः घञन्तस्य दाय-इत्यस्य अन्तस्य यकारोत्तरस्य अकारस्य प्रकृतसूत्रेण उदात्तस्वरः सिध्यति।

विशेषः- घञन्तशब्दानां ञ्नित्यादिर्नित्यम् इत्यनेन आदेः अचः उदात्तस्वरः भवति। परन्तु इदं सूत्रं बाधित्वा घञन्तस्य कर्षधातोः घञन्ताकारयुक्तधातोश्च प्रकृतसूत्रेण अन्तः अच् उदात्तः भवति।

प्रकृतसूत्रे कर्ष-इत्यत्र शप्प्रत्ययेन (कृ+शप्) निर्देशः न तु घञ्प्रत्ययेन, तेन तुदादिगणीयः यः कृधातुः तस्माद् घञ्प्रत्यये तदन्तस्य शब्दस्य अन्तस्य अचः प्रकृतसूत्रेण न उदात्तस्वरः अपि च ञ्नित्यादिर्नित्यम् इत्यनेन आदेः अचः उदात्तस्वरः इति बोध्यम्।

१०.८) उञ्छादीनाञ्च॥ (६.१.१६०)

सूत्रार्थः- अन्त उदात्तः स्यात्।

सूत्रव्याख्या- विधिसूत्रमेतत्। अनेन सूत्रेण उदात्तस्वरो विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः, उञ्छादीनाम् इति षष्ठीबहुवचनान्तं, च इति अव्ययपदम्। अस्मिन् सूत्रे कर्षात्वतो घञोऽन्त उदात्तः इत्यस्मात् सूत्रात् अन्तः इति प्रथमान्तम्, उदात्तः इति प्रथमान्तञ्च पदमनुवर्तते। उदात्तानुदात्तादिकं च अचः एव सम्भवति अतः अच् इति संयुज्यते। उञ्छः आदिः यस्य स उञ्छादिः तेषाम् उञ्छादीनाम् इति। उञ्छादिरेकः गणः तत्र उञ्छ-म्लेच्छ-जञ्ज-जल्प-जप-वध-युग-वेग-वेद-इत्येते शब्दाः सन्ति। अस्मिन् गणे अष्टौ गणसूत्राण्यपि सन्ति। एवम् अस्य सूत्रस्य अर्थो भवति उञ्छादिगणपठितानां शब्दानां अन्तः अच् उदात्तः भवति।

उदाहरणम्- अस्य सूत्रस्य उदाहरणानि भवन्ति स॒त्यं ब्रवीमि व॒ध इत् स तस्य॑(तै. ब्रा.२-८-८-७) इति। वै॒श्वा॒न॒रः कु॑शि॒केभि॑र्यु॒गेयु॑गे इति, गाव॒ः सोम॑स्य प्र॒थम॑स्य भ॒क्षः इति च।

सूत्रार्थसमन्वयः- वध-इति शब्दः उञ्छादिगणे पठितः अतः अत्र प्रथमे वाक्ये तावत् वध इत्यत्र धकारोत्तरस्य अकारस्य उदात्तस्वरः। युगशब्दः उञ्छादिगणे पठितः तेन कुशिकेभिर्युगेयुगे इत्यत्र गकारोत्तरस्य एकारस्य प्रकृतसूत्रेण उदात्तस्वरः सिध्यति। घञन्तः भक्षशब्दोऽपि उञ्छादिगणे पठितः, तेन गावः प्रथमस्य भक्ष इत्यत्र षकारोत्तरस्य अकारस्य प्रकृतसूत्रेण उदात्तस्वरः।

विशेषः- युञ्ज्-धतोः घञ्प्रत्यये निष्पन्नः युग-इति शब्दः उञ्छादिगणे पठितः। अत्र घञ्प्रत्यये परे पूर्वस्य पुगन्तलघूपदस्य च इति गुणः प्राप्त आसीत् परन्तु गणपाठे एवमेव पाठात् गुणनिषेधः निपात्यते।

१०.९) ञ्नित्यादिर्नित्यम्॥ (६.१.१९७)

सूत्रार्थः- ञिदन्तस्य निदन्तस्य चादिरुदात्तः स्यात्।

सूत्रव्याख्या- विधिसूत्रमेतत्। अनेन सूत्रेण उदात्तस्वरः विधीयते। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। अत्र ञ्निति इति सप्तम्येकवचनान्तं, आदिः इति प्रथमैकवचनान्तं, नित्यम् इति प्रथमैकवचनान्तं पदम्। ञ्निति इत्यस्य सप्तम्यन्तत्वात् तस्मिन्निति निर्दिष्टे पूर्वस्य इत्यनेन पूर्वस्य कार्यमिति बोध्यम्। ञ्निति इत्यत्र ञ् च न् च ञ्नौ, ञ्नौ इतौ यस्य स ञ्नित् इति तस्मिन् ञ्निति इति ञिति निति च इत्यर्थः। अस्मिन् सूत्रे कर्षात्वतो घञोऽन्त उदात्तः इत्यस्मात् सूत्रात् उदात्तः इति प्रथमान्तं पदमनुवर्तते। उदात्तः इत्यत्र प्रथमान्तत्वाद् इदं विधायकपदमिति ज्ञायते। तेन अस्य सूत्रस्यार्थो भवति ञिति निति च परे तदन्तस्य शब्दस्य नित्यम् आदिः उदात्तः भवति।

उदाहरणम्- अस्य उदहरणं भवति यस्मिन् विश्वा॑नि पौंस्या॑(ऋ.१.६.९) इति, सुते द॑धिष्व नश्चनः(ऋ.१-३-६)इति।

सूत्रार्थसमन्वयः- पुंसः कर्माणि इत्यर्थे गुणवचनब्राह्मणादिभ्यः ष्यञ्कर्मणि च इत्यनेन पुंस्-शब्दात् ष्यञ्प्रत्यये पौंसानि इति पदं निष्पद्यते। ष्यञ्प्रत्ययस्य ञकारस्य इत्संज्ञा तथा तस्य लोपः इत्यनेन लोपश्च भवति अतः अवशिष्टं यत् ष्य-इति तत् ञिद् इत्युच्यते। एवं ञिति परे तदन्तस्य पौंस्यानि इत्यस्य आदेः अचः औकारस्य प्रकृतसूत्रेण उदात्तस्वरो भवति। वेदे पौंस्यानि इत्यत्र सुपां सुलुक् पूर्वसवर्णाच्छेयाडाड्यायाजालः इत्यनेन प्रथमाबहुवचने डाप्रत्यत्ये प्रक्रियाकार्ये च पौंस्या इति रूपम्।

चायृ पूजानिशामनयोः इति धातोः चायतेरन्ने ह्रस्वश्च इत्यौणादिकसूत्रेण असुन्प्रत्यये आकारस्य अकारे नुडागमेऽनुबन्धलोपे चय् न् अस् इति स्थिते लोपो व्योर्वलि इत्यनेन यकारस्य लोपे प्रक्रियायां चनः इति रूपम्। अत्र असुन्प्रत्ययस्य नकारस्य इत्संज्ञा भवति अतः असुन्प्रत्ययः नित् भवति, तेन निति असुन्प्रत्यये परे तदन्तस्य चनः इत्यस्य आदेः अचः अकारस्य प्रकृतसूत्रेण उदात्तस्वरः भवति।

विशेषः- पुंस्-शब्दस्य यद्यपि ब्राह्मणादिगणे पाठः नास्ति तथापि ब्राह्मणादेराकृतिगणत्वात् पुंस्-शब्दस्य अत्रैव ग्रहणम्। आकृत्या स्वरूपेण यत्र शब्दनां ग्रहणं भवति स आकृतिगणः।

१०.१०) अन्तश्च तवै युगपत्॥ (६.१.२००)

सूत्रार्थः- तवै-प्रत्ययान्तस्याद्यन्तौ युगपदादुदात्तौ स्तः।

सूत्रव्याख्या- विधिसूत्रमेतत्। अनेन सूत्रेण उदात्तस्वरो भवति। अस्मिन् सूत्रे चत्वारि पदानि सन्ति। अन्तः इति प्रथमैकवचनान्तं, च इति अव्ययपदं, तवै इत्यत्र लुप्तप्रथमान्तनिर्देशः, युगपद् इति अव्ययपदम्। अत्र तवै-इति प्रत्ययविशेषस्य ग्रहणम्, तेन प्रत्ययग्रहणे तदन्ताः ग्राह्याः इति परिभाषया तवै-प्रत्ययान्तस्य इति लभ्यते। ञ्नित्यादिर्नित्यम् इत्यस्मात् सूत्राद् आदिरिति अनुवर्तते। अस्मिन् सूत्रे कर्षात्वतो घञोऽन्त उदात्तः इत्यस्मात् सूत्रात् उदात्तः इति प्रथमान्तं पदमनुवर्तते। उदात्तः इत्यत्र प्रथमान्तत्वाद् इदं विधायकपदमिति ज्ञायते। तेन अस्य सूत्रस्यार्थो भवति तवै-प्रत्ययान्तस्य आदिः अन्तश्च युगपद् उदात्तः भवति इति।

उदाहरणम्- अस्य उदहरणं भवति नान॑से यातवै (तै. सं ६-२-६-१)। इति।

सूत्रार्थसमन्वयः- अत्र याधातोः कृत्यार्थे तवैकेन्केन्यत्वनः इत्यनेन तवै-प्रत्ययेन यातवै इति रूपम् अभवत्। एवं यातवै इत्यस्य तवै-प्रत्ययान्तत्वात् तस्य आदिः स्वरः यकारोत्तरः अकारः अन्तः स्वरः वकारोत्तरः ऐकारश्च युगपद् अनेन सूत्रेण उदात्तसंज्ञकः।

विशेषः- अस्मिन् सूत्रे युगपद् ग्रहणं पर्यायनिवृत्यर्थम्। तेनात्र एकस्मिन् पक्षे आदिः उदात्तः अपरस्मिन् पक्षे अन्तः उदात्तः इति पर्यायेण अत्र विधानं न भविष्यति अपि च युगपदेव आदौ अन्ते च उदात्तस्वरस्य विधानं भविष्यति।

१०.११) क्षयो निवासे॥ (६.१.२०१)

सूत्रार्थः- आद्युदात्तः स्यात्।

सूत्रव्याख्या- विधिसूत्रमेतत्। अनेन सूत्रेण उदात्तस्वरः विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। क्षयः प्रथमैकवचनान्तं, निवासे इति सप्तम्येकवचनान्तं पदम्। क्षय इति शब्दस्वरूपस्य ग्रहणम्। निवास इति अर्थनिर्देशः। ञ्नित्यादिर्नित्यम् इत्यस्मात् सूत्राद् आदिरिति अनुवर्तते। अस्मिन् सूत्रे कर्षात्वतो घञोऽन्त उदात्तः इत्यस्मात् सूत्रात् उदात्तः इति प्रथमान्तं पदमनुवर्तते। उदात्तः इत्यत्र प्रथमान्तत्वाद् इदं विधायकपदमिति ज्ञायते। तेन अस्य सूत्रस्य अर्थो भवति क्षयशब्दस्य आदिः उदात्तः भवति निवासे अर्थे इति।

उदाहरणम्- स्वे क्षयै॑ शुचिव्रत।(तै.ब्रा. १-४-१-७)।

सूत्रार्थसमन्वयः- क्षि निवासगत्योः इति क्षिधातोः अर्थद्वयमस्ति। तत्र निवासेऽर्थे क्षियन्ति निवसन्ति अस्मिन् इति विग्रहे अधिकरणे क्षिधातोः पुंसि संज्ञायां घः प्रायेण इत्यनेन घप्रत्यये प्रक्रियायां क्षयशब्दः निष्पद्यते। अत्र क्षयशब्दस्य निवासेऽर्थे विद्यमानत्वात् प्रकृतसूत्रेण आदेः षकारोत्तरस्य अकारस्य उदात्तस्वरः सिध्यति।

१०.१२) वृषादीनां च॥ (६.१.२०३)

सूत्रार्थः- वृषादिगणपठिताः शब्दाः आद्युदात्ताः स्युः।

सूत्रव्याख्या- विधिसूत्रमेतत्। अनेन सूत्रेण उदात्तस्वरः भवति। अस्मिन् सूत्रे द्वे पदे स्तः। वृषादीनाम् इति षष्ठीबहुवचनान्तं, च इत्यव्ययपदम्। वृषः आदिः यस्य स वृषादिः, तेषामिति। वृषादिः एकः गणः।

वृषादिगणे तावत् वृष-जन-त्वर-हय-गय-नय-तय-अंश-वेद-सूद-पद-गुहाः इत्यादयः शब्दाः सन्ति। ञ्नित्यादिर्नित्यम् इत्यस्मात् सूत्राद् आदिरिति अनुवर्तते। अस्मिन् सूत्रे कर्षात्वतो घञोऽन्त उदात्तः इत्यस्मात् सूत्रात् उदात्तः इति प्रथमान्तं पदम् अनुवर्तते। उदात्तः इत्यत्र प्रथमान्तत्वाद् इदं विधायकपदमिति ज्ञायते। तेन अस्य सूत्रस्य अर्थः भवति वृषादिगणे पठितानां शब्दानाम् आदिस्वरः उदात्तः भवति।

उदाहरणम्- अस्य उदहरणं भवति वृषो॑ अ॒ग्निः समि॑ध्यते।(तै.ब्रा. २-४-६-१०)।

सूत्रार्थसमन्वयः- वृषु सेचने इति धातोः इगुपधज्ञाप्रीकिरः कः इत्यनेन सूत्रेण कप्रत्यये वृषशब्दः निष्पद्यते। अत्र प्रत्ययस्वरः अर्थात् आद्युदात्तश्च इत्यनेन ककारोत्तस्य अकारस्य उदात्तः प्राप्तः आसीत् तेन वृषशब्दः अन्तोदात्तः अभवत्। परन्तु तं बाधित्वा वृषशब्दस्य वृषादिगणे पाठात् वृषादीनां च इत्यनेन अस्य आदेः वकारोत्तरस्य ऋकारस्य आद्युदात्तस्वरः भवति।

विशेषः- वृषदिगणः एकः आकृतिगणः। तेन यस्य शब्दस्य अत्र पाठः नास्ति अपि च केनापि सूत्रेण आद्युदात्तस्वरः न विहितः। तथापि आद्युदात्तस्वरः अस्ति। अतः तस्यापि आकृत्या अत्र वृषादिगणे पाठः स्वीकर्तव्यः इति बोध्यम्।

पाठगतप्रश्नाः२

३५. कर्षात्वतः इत्यत्र कर्षशब्देन कथं तुदादिगणीयधातोः ग्रहणं न?
३६. उञ्छादिगणे कति गणसूत्राणि सन्ति?
३७. पंस्-शब्दस्य कथं ब्राह्मणादिगणे पाठः?
३८. अन्तश्च तवै युगपद् इत्यत्र युगपद्ग्रहणं किमर्थम्?
३९. क्षयशब्दस्य कस्मिन् अर्थे आदिः उदात्तः भवति?
४०. वृषौ अग्निः समिंध्यते इत्यत्र वकारोत्तरस्य ऋकारस्य केन सूत्रेण उदात्तस्वरः?

१०.१३) संज्ञायामुपमानम्॥ (६.१.२०४)

सूत्रार्थः- उपमानशब्दः संज्ञायामाद्युदात्तः स्यात्।

सूत्रव्याख्या- विधिसूत्रमेतत्। अस्मिन् सूत्रे द्वे पदे स्तः। संज्ञायाम् इति सप्तम्येकवचनान्तं, उपमानम् इति प्रथमैकवचनान्तं पदम्। अस्मिन् सूत्रे ञ्नित्यादिर्नित्यम् इत्यस्मात् सूत्राद् आदिरिति अनुवर्तते। अत्र कर्षात्वतो घञोऽन्त उदात्तः इत्यस्मात् सूत्रात् उदात्तः इति प्रथमान्तं पदमनुवर्तते। उदात्तः इत्यत्र प्रथमान्तत्वाद् इदं विधायकपदमिति ज्ञायते। तेन अस्य सूत्रस्यार्थः भवति संज्ञायाम् उपमानशब्दस्य आदिः अच् उदात्तः भवति।

उदाहरणम्- चञ्चेव चञ्चा इति।

सूत्रार्थसमन्वय- चञ्चा-शब्दस्य तृणनिर्मितपुरुषः इत्यर्थः। चञ्चासदृशः पुरुषः अपि चञ्चा इति भवति। तत्र चञ्चा-शब्दात् इवे प्रतिकृतौ इति सूत्रेण विहितस्य कन्प्रत्ययस्य लुम्मनुष्ये इति सूत्रेण लोपः। एवमत्र चञ्चा-शब्दस्य उपमानवाचकत्वात् संज्ञावाचकत्वाच्च प्रकृतसूत्रेण तस्य आदेः अचः चाकारोत्तरस्य अकारस्य उदात्तस्वरो भवति।

विशेषः- ननु चञ्चा-शब्दात् कन्प्रत्यये अनुबन्धलोपे च चञ्चा क(कन्) इति स्थिते कन्प्रत्ययस्य नकारस्य इत्संज्ञकत्वात् तस्य लोपे च प्रत्ययलोपे प्रत्ययलक्षणम् इत्यनेन कन्प्रत्ययः नित् भवति। तस्मिन् निति परे पूर्वस्य चकारोत्तरस्य अकारस्य तु ञ्नित्यादिर्नित्यम् इत्यनेनैव आद्युदात्तस्वरः सिध्यति तेन प्रकृत-सूत्रेण आद्युदात्तस्वरविधानस्य का आवश्यकता इति चेदुच्यते- एतदेव ज्ञापकं यत् वेदे क्वचित्स्वरविधौ प्रत्ययलोपे प्रत्ययलक्षणमिति न गृह्यते। एवम् अत्र प्रत्ययलोपे प्रत्ययलक्षणम् इत्यस्य ग्रहणाभावे चञ्चा क इत्यत्र नित्त्वाभावात् न चाकारोत्तरस्य अकारस्य ञ्नित्यादिर्नित्यम् इत्यनेन आद्युदात्तस्वरः सिध्यति। तेन आद्युदात्तस्वरस्य विधानाय प्रकृतसूत्रं प्रारभ्यते।

अस्मिन् सूत्रे संज्ञायामित्युक्तत्वात् यत्र संज्ञा नास्ति तत्र नेदं सूत्रं प्रवर्तते यथा अग्निर्माणवकः इति । अत्र उपमानत्वे अपि संज्ञा नास्ति अतः मकारोत्तरस्य अकारस्य न उदात्तस्वरः। यत्र च उपमानं नास्ति तत्रापि नेदं सूत्रं प्रवर्तते यथा चैत्रः इति, अत्र संज्ञात्वे अपि उपमानत्वं नास्ति। अतः अत्र न चकारोत्तरस्य ऐकारस्य उदात्तस्वरः।

१०.१४) अशितः कर्ता॥ (६.१.२०७)

सूत्रार्थः- कर्तृवाची अशितशब्दः आद्युदात्तः।

सूत्रव्याख्य- विधिसूत्रमेतत्। अनेन सूत्रेण उदात्तस्वरो भवति। अस्मिन् सूत्रे द्वे पदे स्तः। अशितः इति प्रथमैकवचनान्तं कर्ता इत्यपि प्रथमैकवचनान्तं पदम्। अस्मिन् सूत्रे ञ्नित्यादिर्नित्यम् इत्यस्मात् सूत्राद् आदिरिति अनुवर्तते। अत्र कर्षात्वतो घञोऽन्त उदात्तः इत्यस्मात् सूत्रात् उदात्तः इति प्रथमान्तं पदमनुवर्तते। उदात्तः इत्यत्र प्रथमान्तत्वाद् इदं विधायकपदमिति ज्ञायते। तेन अस्य सूत्रस्य अर्थो भवति अशितशब्दः यदा कर्ता तदा अस्य शब्दस्य आदिः अच् उदात्तः भवति।

उदाहरणम्- कृ॒षन्नित्फा॒ल आशितम् इत्यस्य उदाहरणम्।

सूत्रार्थसमन्वयः- आङ्पूर्वकात् अश्धातोः कर्तरि क्तप्रत्यये आशितम् इति रूपम्। अत्र आशितशब्दः कर्तृवाचकः विद्यते। अतः अस्य आदेः अचः अकारस्य प्रकृतसूत्रेण उदात्तस्वरः भवति।

विशेषः- ननु आङ्पूर्वकात् अश्-धातोः कर्तरि क्तप्रत्ययविधानस्य किमपि सूत्रं नास्ति तर्हि कथं क्तप्रत्ययः इति चेदुच्यते अत्र क्तप्रत्ययः निपात्यते इति।

अत्र अन्ये वैयाकरणाः अश्-धातोः कर्तरि क्तप्रत्यये अशितशब्दं निष्पादयन्ति। तदा तु क्तप्रत्ययः उपधादीर्घश्च उभौ एव निपात्येते इति।

१०.१५) युष्मदस्मदोर्ङसि॥ (६.१.२११)

सूत्रार्थः- आदिरुदात्तः स्यात्।

सूत्रव्याख्या- विधिसूत्रमेतत्। अनेन सूत्रेण उदात्तस्वरः विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। युष्मदस्मदोः इति षष्ठ्येकवचनान्तं, ङसि इति सप्तम्येकवचनान्तं पदम्। ङसि इत्यत्र सप्तमीनिर्देशात् तस्मिन्निति निर्दिष्टे पूर्वस्य इत्यनया परिभाषया षष्ठ्येकवचने परे सति पूर्वस्य कार्यमिति बोध्यम्। अस्मिन्

सूत्रे ञ्नित्यादिर्नित्यम् इत्यस्मात् सूत्राद् आदिरिति अनुवर्तते। अत्र कर्षात्वतो घञोऽन्त उदात्तः इत्यस्मात् सूत्रात् उदात्तः इति प्रथमान्तं पदमनुवर्तते। उदात्तः इत्यत्र प्रथमान्तत्वाद् इदं विधायकपदमिति ज्ञायते। तेन अस्य सूत्रस्य अर्थः भवति ङसि परे सति पूर्वयोः युष्मदस्मदोः आदिः अच् उदात्तः भवति इति।

उदाहरणम्- अस्य सूत्रस्य उदाहरणं भवति नहिषस्तव नो मम इति।

सूत्रार्थसमन्वयः- युष्मत्-शब्दात् अस्मत्- शब्दाच्च ङस्-प्रत्यये यष्मदस्मद्भ्यां ङशोऽश् इत्यनेन ङशः अशादेशे तवममौ ङसि इत्यनेन युष्मदः मपर्यन्तस्य तव इत्यादेशे अस्मदः मपर्यन्तस्य च मम इत्यादेशे प्रक्रियाकार्ये तव मम इति रूपद्वयं सिध्यति। अत्र तव मम इत्यनयोः ङसन्तत्वात् तस्मिन परे तकारोत्तरस्य अकारस्य मकारोत्तरस्य अकारस्य च प्रकृतसूत्रेण उदात्तस्वरः सिध्यति।

१०.१६) ङयि च॥ (६.१.२११)

सूत्रार्थः- युष्मदस्मदोः आदिरुदात्तः स्यात्।

सूत्रव्याख्या- विधिसूत्रमेतत्। अनेन सूत्रेण उदात्तस्वरः विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। ङयि इति सप्तम्येकवचनान्तम्। च इति अव्ययपदम्। ङयि इत्यत्र सप्तमीनिर्देशात् तस्मिन्निति निर्दिष्टे पूर्वस्य इत्यनया परिभाषया चतुर्थ्येकवचने परे सति पूर्वस्य कार्यमिति बोध्यम्। अस्मिन् सूत्रे ञ्नित्यादिर्नित्यम् इत्यस्मात् सूत्राद् आदिरिति अनुवर्तते। अत्र कर्षात्वतो घञोऽन्त उदात्तः इत्यस्मात् सूत्रात् उदात्तः इति प्रथमान्तं पदमनुवर्तते। उदात्तः इत्यत्र प्रथमान्तत्वाद् इदं विधायकपदमिति ज्ञायते। तेन अस्य सूत्रस्य अर्थः भवति ङयि परे सति पूर्वयोः युष्मदस्मदोः आदिः अच् उदात्तः भवति इति।

उदाहरणम्- अस्य सूत्रस्य उदाहरणं भवति तुभ्यं हिन्वानः इति। मह्यं वातः पवताम् इति च।

सूत्रार्थसमन्वयः- युष्मत्-शब्दात् अस्मत्- शब्दाच्च ङे इति प्रत्यये ङे-प्रथमयोरम् इत्यनेन ङे इत्यस्य अमादेशे तुभ्यमह्यौ ङयि इत्यनेन युष्मदः मपर्यन्तस्य तुभ्य इत्यादेशे अस्मदः मपर्यन्तस्य च मह्य इत्यादेशे प्रक्रियाकार्ये तुभ्यं मह्यम् इति रुपद्वयं सिध्यति। अत्र तुभ्यं, मह्यम् इत्यनयोः ङे इति प्रत्ययौ अन्ते विद्येते। ङे इति परे तुभ्यम् इत्यत्र तकारोत्तरस्य आदेः अचः उकारस्य मह्यम् इत्यत्र मकारोत्तरस्य आदेः अचः अकारस्य च प्रकृतसूत्रेण उदात्तस्वरः सिध्यति।

१०.१७) यतोऽनावः॥ (६.१.११३)

सूत्रार्थः- यत्प्रत्ययान्तस्य द्व्यचः आदिः उदात्तः नावं विना इति।

सूत्रव्याख्या- विधिसूत्रमेतत्। अनेन सूत्रेण उदात्तस्वरो विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। यतः, अनावः इति सूत्रगतपदच्छेदः। यतः इति षष्ठ्येकवचनान्तम्। अनावः इति पञ्चम्येकवचनान्तं पदम्। अत्र यत् इति प्रत्ययः। तस्मात् प्रत्ययग्रहणे तदन्तग्रहणम् इत्यनेन तदन्तग्रहणं भविष्यति। तेन यत्प्रत्ययान्तस्य इत्यर्थः। अनावः इत्यस्य नौ इति शब्दं विना इत्यर्थः। अस्मिन् सूत्रे निष्ठा च द्व्यजनात् इत्यस्मात् सूत्रात् द्व्यच् इत्यनुवर्तते। तच्चात्र पञ्चम्यन्ततया विपरिणम्यते। एवम् अस्य सूत्रस्य अर्थो भवति यत्प्रत्ययान्तस्य अज्द्वययुक्तस्य शब्दस्य आदिः अच् उदात्तः भवति नौशब्दस्य तु न भवति इति।

उदाहरणम्- युञ्जन्त्यस्य काम्यां इति।

सूत्रार्थसमन्वयः- कमु कान्तौ इति धातोः कमेर्णिङ् इत्यनेन स्वार्थे णिङ्प्रत्ययेऽनुबन्धलोपे अत उपधायाः इत्यनेन कम्-धातोः ककारोत्तरस्य अकारस्य वृद्धौ आकारे निष्पन्नस्य कामि इत्यस्य सनाद्यन्ता धतवः इत्यनेन धातुसंज्ञा सिध्यति। ततः अजन्तस्य कमि-धातोः अचो यत् इत्यनेन यत्प्रत्ययेऽनुबन्धलोपे णेरनिटि इत्यनेन मकारोत्तरस्य णिङः इकारस्य लोपे प्रथमाद्विवचने प्रक्रियाकार्ये काम्या इति सिध्यति। अत्र काम्या इत्यस्य यत्प्रत्ययान्तत्वात् यत्प्रत्ययस्य च तकारस्य इत्संज्ञकत्वात् तित्स्वरितम् इत्यनेन स्वरितस्वरः प्राप्तः आसीत्। परन्तु तं बाधित्वा प्रकृतसूत्रेण अज्द्वययुक्तस्य काम्या इत्यस्य आदेः अचः ककारोत्तरस्य आकारस्य उदात्तस्वरः भवति।

नवतिं नाव्यानाम् इत्यादिषु नावा तार्यम् इति विग्रहे नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्य-वध्यानाम्यसमसमितसम्मितेषु इत्यनेन यत्प्रत्यये निष्पन्नस्य नाव्यशब्दस्य षष्ठीबहुवचनान्तं रूपमस्ति। परन्तु प्रकृतसूत्रे अनावः इत्युक्तत्वात् नाव्यानामित्यस्य आदेः अचः नकारोत्तरस्य आकारस्य प्रकृतसूत्रेण न उदात्तस्वरः।

विशेषः- अष्टाध्याय्यां निष्ठा च द्व्यजनात् इत्यस्मात् परम् सप्त सूत्राणि सन्ति ततः परं यतोऽनावः इति प्रकृतसूत्रं विद्यते। एवं मध्यवर्तिसूत्रेषु निष्ठा च द्व्यजनात् इत्यस्मात् सूत्रात् द्व्यच् इत्यस्य अनुवृत्तिः न भवति परन्तु अस्मिन् सूत्रे कथं द्व्यच् इत्यस्य अनुवृत्तिः इति चेदुच्यते मण्डूकप्लुत्या अत्र अनुवृत्तिः इति। मण्डूकः यथा उत्प्लुत्य किञ्चित् किञ्चित् स्थानं परित्यज्य गच्छति तद्वद् इदम् अपि किञ्चित् किञ्चित् सूत्रं परित्यज्य उत्तरोत्तरसूत्रे प्रवर्तते इति ज्ञेयम्।

पाठगतप्रश्नाः-३

४१. उपमानशब्दः कदा आद्युदात्तः?

४२. कीदृशः अशितशब्दः आद्युदात्तः?

४३. मम इत्यत्र मकारोत्तरस्य अकारस्य उदात्तस्वरः केन सिध्यति?

४४. ङयि च इति सूत्रस्य कोऽर्थः?

४५. यतोऽनावः इति सूत्रे अनावः इत्यत्र का विभक्तिः?

पाठसारः

धातोः प्रातिपदिकस्य च स्वरम् अवलम्ब्य पाठोऽयं विरचितो भवति। धातोः विहितानां स्वराणां विषये कानिचित् सूत्राणि आलोचितानि। एवञ्च प्रातिपदिकात् विहितानां स्वराणां विषये कानिचित् सूत्राणि आलोचितानि सन्ति। धातोः विहितस्वराणां विषये सूत्राणि भवन्ति, यथा- धातोः, स्वपादिर्हिंसामच्यनिटि

इत्यादीनि सूत्राणि। धातोः इति सूत्रेण धातोः अन्तः उदात्तः भवति। अस्य उदाहरणं भवति गो॒पा॒यतं॑ नः इति, असिं॑ स॒त्यः इति च। अत्र गुप्-इति धातोः आयप्रत्ययः विहितः तेन निष्पन्नस्य गोपाय इत्यस्य पकारोत्तस्य आकारस्य आद्युदात्तश्च इत्यनेन आद्युदात्तस्वरः। सनाद्यन्ता धातवः इत्यनेन गोपाय इति धातुसंज्ञकः, अतः तस्य अन्तस्य अकारस्यापि प्रकृतसूत्रेण उदात्तस्वरः भवति। प्रातिपदिकात् विहितस्वराणां विषये सूत्राणि भवन्ति, यथा- कर्षात्वतो घञोऽन्त उदात्तः, उञ्छादीनाञ्च इत्यादीनि सूत्राणि। अस्य उदाहरणं भवति कर्षः इति, दायः इति च। कृष विलेखने इति धातोः घञ्प्रत्यये कर्षः इति रूपम्। अत्र घञन्तस्य कर्ष-इत्यस्य अन्तस्य षकारोत्तस्य अकारस्य प्रकृतसूत्रेण उदात्तस्वरः। दा दाने इति आकारयुक्तधातोः आतो युक्चिण्कृतोः इत्यनेन घञ्प्रत्यये दायः इति रूपम्। अत्र आत्वतः घञन्तस्य दाय-इत्यस्य अन्तस्य यकारोत्तरस्य अकारस्य प्रकृतसूत्रेण उदात्तस्वरः सिध्यति।

पाठान्तप्रश्नाः

१. स्वपादिहिंसामच्यनिटि इति सूत्रं व्याख्यात।
२. अभ्यस्तानामादिः इति सूत्रं व्याख्यात।
३. कर्षात्वतो घञोऽन्त उदात्तः इति सूत्रं व्याख्यात।
४. ञ्नित्यादिर्नित्यम् इति सूत्रं व्याख्यात।
५. वृषादीनां च इति सूत्रं व्याख्यात।
६. संज्ञायामुपमानम् इत्यनेन उदात्तस्वरविधानस्य फलं वर्णयत।
७. यतोऽनावः इत्यस्य एकमुदाहरणं प्रदर्श्य समन्वयत।

पा५ठगतप्रश्नानामुत्तराणि

उत्तराणि-१

१. उदात्तस्वरः।
२. अदादिगणान्तर्गतः एकः गणः।
३. अनित्यजादौ लसार्वधातुके परे अभ्यस्तानामादिरुदात्तः।
४. अविद्यमानोदात्ते इत्यर्थः।
५. उदात्तस्वरः।
६. लिति इति सूत्रेण।

उत्तराणि-२

७. शप्प्रत्येन निर्देशात्।

८. अष्टौ।

९. ब्राह्मणादेराकृतिगणत्वात्।

१०. पर्यायनिवृत्यर्तम्।

११. निवासे अर्थे।

१२. वृषादीनां च इति सूत्रेण।

उत्तराणि-३

१३. उपमानशब्दः यदा संज्ञावाचकः तदा इति।

१४. कर्तृवाची अशितशब्दः इति।

१५. युष्मदस्मदोर्ङसि इत्यनेन।

१६. ङयि परे सति युष्मदस्मदोः आदिः उदात्तः भवति इत्यर्थः।

१७. पञ्चमीविभक्तिः।

।।इति दशमः पाठः।।